सदाशयसमुच्चयः

रचयिता

श्री टी० वी० परमेश्वर अय्यरः

१९८१

देववाणी-परिषद्, दिल्ली

सदाशयसमुच्चयः

प्रणेता

पं० टी० वी० परमेश्वर अय्यरः

१९८१

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

सदाशयसमुच्चयः

प्रणेता : टी० वी० परमेश्वर अय्यरः

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहार:, नयी दिल्ली-११००५९

मुद्रक: : देववाणी प्रिंटर्स
उत्तम नगर, नई दिल्ली-११००५९

संस्करणम् : प्रथमम्, १९८१ ई०

मूल्यम् : पञ्चदश रूप्यकाणि, रु० १५.०० (भारते)
डालरपञ्चकं पौण्डद्वयं वा (विदेशेषु)

Sadāśayasamuccayaḥ

Author : Iyer, T. V. Parameswar

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059

Printers : Dev Vani Printers
Uttam Nagar, New Delhi-110059

Edition : First, 1981

Price : Rs. 15.00 only (In India)
5 Dollars or 2 Pounds (Abroad)

प्रास्ताविकम्

'देववाणी-परिषद्, दिल्ली' संस्थायाः सद्ग्रन्थप्रकाशनरूपमप्येकमुद्देश्यमस्ति । तदनुसारमद्यावधि परिषदा इमे संस्कृतभाषानिबद्धा ग्रन्थाः प्रकाशिता:-(१) **सुगमरामायणम्** (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्)(२) **श्रीकृष्णचरितम्** (आचार्यश्रीरमेशचन्द्रशुक्लप्रणीतं महाकाव्यम्) (३) **कर्णभूषणम्** (डॉ० सी० आर० स्वामिनाथ-कृतं नाटकश्लोकगीतिप्रबन्धात्मकं रचनात्रयम्), (४) **अर्वाचीनसंस्कृतमहाकाव्यविमर्शः** (रमाकान्तशुक्लसम्पादितः खण्डद्वयात्मकः समीक्षाग्रन्थः) (५) **हरविजयस्य साहित्यिकमध्ययनम्** (डॉ० कृष्णकान्तशुक्ललिखितम्) (६) **श्रीमदप्पयदीक्षितचरितम्** (डॉ० हरिनारायणदीक्षितरचितम्) (७) **भाति मे भारतम्** (डॉ० रमाकान्तशुक्लप्रणीतं काव्यम्) (८) **भारतस्वातंत्र्यसंग्रामेतिहासः**(डॉ० रमेशन्द्रशुक्लकृतः)। इदानीं च कविदार्शनिकपण्डितटी०वी०परमेश्वरअय्यरप्रणीतः '**सदाशयसमुच्चयः**' विदुषां पुरतः प्रस्तूयते । अस्यां कृतौ अय्यरमहाभागेन भाषान्तरनिबद्धानां सूक्तीनां सरससंस्कृतानुवादो विहितः। आशासे सहृदया एतद्ग्रन्थप्रकाशनेन मोदमेष्यन्ति। अस्माभिरत्राग्रिमपृष्ठेषु संस्कृताङ्ग्लभाषाभ्यां श्रीअय्यरमहाभागस्य संक्षिप्तजीवनपरिचयो दीयते येन जिज्ञासूनां मनस्तोषः स्यात्।

परमेश्वरअय्यरः

कविर्दार्शनिकः

दक्षिणभारते सह्याद्रिपश्चिमाम्बुध्योर्मध्ये राजति केरलनामा देशः नारिकेलमरिचैलादिपादपलतानिचयैरतिरमणीयः। तत्र कुक्कुटक्रोडाभिधे नगरे पाश्चात्यैः "कालिकट" इति व्यवहृते 'सामूतिरि" राजलोकानां राजधानीत्वेन परिलसिते "कोज्झिक्कोट" इति मलयालभाषाभाषिते द्रमिडभाषाभाषिणि ब्राह्मणकुटुम्बे १९१५ तमे क्रैस्तवाब्दे जुलाईमासस्य १६ तारिकायां १८३२२३० तमे कलिवासरे श्रीमतः परमेश्वरअय्यरमहोदयस्य प्रादुर्भावः श्रीमत्याः लक्ष्मीदेव्याः श्रीमतो विश्वनाथअय्यरमहोदयस्य च तनयत्वेन समजनि। परिवारोऽयं पुरा, त्रिचतुराब्दशतकेभ्यः पूर्वं द्रमिडदेशे "तंजाव्वूर" इति प्रथिते शरभोजिमहाराजपरिपालिते भूखण्डे कृतवसतिरासीत्। कवेरस्य पूर्विकः कश्चित् तत्र राजकीयः आस्थानकविरासीत् इति श्रूयते। किन्तु अर्वाचीनसमये एतत्परिवारे न कोऽपि संस्कृतज्ञः समभूत् इति ज्ञायते। परमेश्वरअय्यरमहोदयस्य संस्कृताध्ययनं काकतालीयन्यायोदाहरणरूपत्वमावहति। १९३२ तमे संवत्सरे हाईस्कूलपरीक्षायां गणिते संस्कृते च लब्धभूर्यङ्कः विजयिषु छात्रेषु प्राप्तप्रथमस्थानः वटुरयं इयेष महाविद्यालयप्रविष्टिम्। पञ्चाशद्रूप्यकपरिमितात् प्रतिमासवेतनात् महाविद्यालयशुल्कभूतस्य पञ्चपरूप्यकात्मकस्य महतो द्रव्यराशेः (?) व्ययः दुश्शक इति पितृचरणैः निश्चये कृते कालिजाधिकृतैः छात्रवृत्तिप्रदाने अङ्गीकृतेऽपि बहूनामितरेषां प्रश्नानां प्रादुर्भावात् हेतोः महाविद्यालयद्वारे अनुद्घाटिते अनारूढश्मश्रुर्बालो महात्म-

गान्धिमहोदयैः समारब्धे राष्ट्रियान्दोलने भागभाक्त्वेन कारागारवासमवाप। १९३३-१९३९ वत्सरेषु त्रिप्पूणित्तुरा इति प्रथिते ग्रामवल्लजे गोश्रीशैः (कोचिनराजभिः) स्थापितायां संस्कृतपाठशालायां संस्कृताध्ययनं कृत्वा न्याय-दर्शनप्रारम्भिकग्रन्थावलोकनपुरस्सरं वेदान्तदर्शने संप्राप्त-"भूषण" "शिरोमणि" विरुदद्वयः साहित्ये लब्धप्रवेशः सञ्जातः। आदौ मलयालभाषायां सञ्चालिततूलिकः पश्चात् हिन्दीसंस्कृतद्रमिडभाषा-इंग्लिशभाषास्वपि कथा-लेखादिकं व्यरचत्।

१९३९-१९७४ मध्ये शिक्षाक्षेत्रे कृतपरिश्रमः सेवा परितोषितपञ्चदशविद्यालयसंस्थानः अध्यापनवेलायामेव कृताध्ययनः प्राप्तविविधविश्वविद्यालयीयविरुदः अधीति-बोधाचरणप्रचारणात्मकं चतुर्दशतत्रं स्वप्राप्तविद्यासु कृत-वान्।

१९७५-१९७९ काले स्विट्झरलैण्डदेशे सीलिस्बार्ग् ग्रामे महर्षियूरोपियनरिसर्चविश्वविद्यालये 'संस्कृत-साहित्यप्रोफसर्'-पदमलञ्चकार। ध्यानाभ्यासेन समवाप्त-विविधकल्याणगुणगणः कविताशक्त्युपबृंहणेन नाना-विषयान् अधिकृत्य रचितश्लोकसहस्रचतुष्टयाधिकः इदानी-मपि गीर्वाणवाणीकैङ्कर्यमाचरति। यूरोपखण्डे विलायते वेस्टइण्डीजभिधेषु द्वीपसमूहेषु च कृतपर्यटनः वैदिक संस्कृतिप्रभृतीन् धार्मिकविषयान् अधिकृत्याङ्गलभाषायां प्रदत्तभाषणचयः तत्तद्देशीयानां श्लाघापात्रमभवत्।

अधुना परमेश्वरअय्यरमहोदयानां साहित्यसेवामुद्दिश्य दिग्दर्शनं क्रियते। तेषां रचनाभ्यः कांश्चित् श्लोकान् समा-क्षायाः समालोचनोक्तिभ्यश्च विनैव प्रदर्शयामः येन सहृदया रसिकाः स्वयं जानीयुस्तेषां प्रतिभा कीदृशीति।

वैयाकरणानां मनागुरे रचितौ श्लोकौ :—

पुनः कथं स्यात् प्रथमान्तशब्दः
कथं द्वितीयान्तपदं कथं स्यात् ।
शनैस्तृतीयेति न वाच्यमद्य
विहाय शब्दो न भवेच्चतुर्थी ॥
चिरादिति स्यान्नहि पञ्चमी वा
विहस्य षष्ठीति न विद्वदुक्तिः ।
ऋते च शब्दः किमु सप्तमी स्यात्
न बुध्यते हन्त विभक्तिविद्या ॥

"गान्ध्युदन्त संक्षेपात्" कश्चित् श्लोकः :—

अध्यात्मशक्त्या किल राष्ट्रनीतिं
चक्रे पवित्रां गतकल्मषां यः ।
सत्यप्रतिष्ठामनघामहिंसा-
मार्गं च यः सन्ततमाचकांक्ष ॥

'स्विस्‌देशप्रकृतिवर्णनात् कश्चित् श्लोकः

तूलमार्जकशालायां कार्पासशकला इव ।
सर्वत्र च विकीर्यन्ते श्वेता हिमकणव्रजाः ॥

हिमावृते मार्गे गच्छन् कदाचित् कविः निपपात ।

तद्वर्णनपरः कश्चित् श्लोकः :—

छत्रं मल्लमहाशया द्धृतदण्ड्
गृह्णन् यियासुश्च तत्-
"पत्रालीसुनिकेतनं" (डाकखाना)
हिमनिपातात्यन्तसान्द्रे पथि ।
पादप्रस्खलनान्निपत्य विलुठन्
सक्थिव्यथां प्राप्तवान्
तन्त्रीछेदकृतातपत्रविहति-
क्लेशान्वितं मे मनः ॥

स्विस्‌देशप्रकृतिवर्णनादपरः श्लोकः :—

अदृश्यांभस्तलेऽमुष्मिन् कासारे धूमिकावृते ।
क्षीरांभोनिधिरेवायमिति जाता मतिर्मम ॥

यैः हिमनिपातः साक्षात् दृष्टस्तैः नितरामास्वाद्योऽयं श्लोकः इति किमु वक्तव्यम् ?

शंभुस्तोत्रात्मकः कश्चित् श्लोकः

चराचरान् पातुमुदग्रवीर्यं
गरानलं पातुमियेष शंभुः ।
सुराधिनाथं सुसमृद्धिकामः
परात्परं तं प्रणमामि भक्त्या ॥

फललवनप्रवृत्तस्य कवेः स्वानुभवप्रयुक्ता विचारव्यक्तिः :—

त्वगेकदेशे स्फुटितेऽपि किंचित्
कनिष्ठिकाग्रे भवति व्यथा मे ।
पुरा भटाः शस्त्रहतांघ्रिहस्ताः
कथं भवेयुर्व्यथिता न भूयः ॥

कस्मिंश्चित् प्रसंगे "स्वातन्त्र्य" निर्वचनम् :—

आत्मा बुद्धिरपीन्द्रियाणि च मनः सर्वं च कुर्याद्वशे
न ब्रूयाद्वचनं परस्य हृदयोद्वेगस्तु यस्माद् भवेत् ।
कर्तव्यं जनताहितार्थमखिलं त्याज्यं च हिंसादिकं
स्वातन्त्र्यं हि तदुच्यते सुखकरं नोच्छृंखलत्वं पुनः ॥

तत्रैव निर्भयत्वनिरुक्तिः :—

लोकोपप्लवकारि दुर्नयवतां व्यत्ययस्यतां दुष्कृति-
र्निष्ठां पालय लोभने बहुविधे साम्मुख्यमापादिते ।
न्याय्यं कर्म समाचरानवरतं प्रत्यूहरुद्धोऽपि सन्
निर्भीकत्वमुदाहृतं न खलु तद्धाष्ट्र्यं न वा साहसम् ॥

तत्रैव "आरोग्य" विवेचनम् :—

चित्तं सत्त्वगुणान्वितं नवनवोन्मेषाढ्यमुल्लासि तद्
वर्ष्माऽतन्द्रमनारतश्रमसहिष्णूद्दामवीर्यं पुनः ।
स्नायुस्फूर्तियुतं तथोपचितिमज्जानीह्यमीभिर्गुणै-
रारोग्यं परमं न केवलमभावोऽयं रुजामुच्यते ॥

"देशोनरत्नमाला" स्तोत्रतः कश्चित् श्लोकः :—

सद्बुद्धिः किल सत्सु दातृषु वरा या दानशक्तिर्मता
मेधाशक्तिरुदीरिता बुधजनेष्वाराधिता शंभुना ।

शीलाढ्यासु पतिव्रतासु महिता या प्रेमशक्तिः स्मृता
नित्या नित्यगुणान्विता निरुपमा वन्देऽद्य तां शांभवीम् ॥

"भारतगौरवात्" कश्चित् श्लोकः :—

धर्मादपैति न मनागपि सत्त्वनिष्ठा-
दर्थान् यथावदवलम्ब्य तनोत्यभीष्टम् ।

कामानवाप्य न हि विस्मरति स्वकृत्यं
मोक्षे निवेशयति वित्तमुदग्रबोधम् ॥

कविना स्विस्देशीय राष्ट्रगीतं, शर्मण्यदेशराष्ट्रगीतं, स्त्रीडन्-देशराष्ट्रगीतं च संस्कृतश्लोकैः परावर्तितं तत्तद्देशेषु भाषणावसरे श्रावितं च । फ्रान्स्-कनाडा-अमेरिका-प्रभृतीनां देशानां वर्णनं च बहुधा कृतं वर्तते । विस्तरभयादुदाहरणानि नात्र दीयन्ते ।

साहित्यकौतुकम् इति नाम्ना कवेः अतिनूतना काचित् कृतिः वर्तते। अस्मिन् शार्दूलविक्रीडितच्छन्दोनिबद्धाः शतद्वयपरिमिताः श्लोकाः सन्ति पञ्चविंशत्यष्टकैः घटिताः। एकैकस्मिन् अष्टके शीर्षकशब्दस्य अष्टसु विभक्तिषु प्रयोगः कृतः। विषयाश्च।

श्रीकालिदासः, योषा, द्रविणम्, विद्वान्, राष्ट्रनेता चलच्चित्रम्, सैनिकः, ग्रामः, पुरी, पत्रिका, पादपः, भारतम्, प्रेमा, भिक्षुकः, निद्रा, वस्त्रम्, वेश्म, भोजनम्, दानम्, धर्मः, भक्तिः, मोक्षश्चेति (२२) तथा च श्रीकृष्णाष्टकम्, ख्रिस्तुदेवाष्टकम्, श्रीरुद्राष्टकम् चेति त्रयं च। शीघ्रमेव ग्रन्थस्यास्य प्रकाशनमाशास्यते । विस्तरतोऽत्र नोदाहरणानि दीयन्ते। सहृदयानां मनोविनोदाय पञ्चषाः श्लोकाः प्रदर्श्यन्ते :—

अद्यत्वे सुरभारतीविषयिणी विद्याप्रवृत्तिर्गता
न्यूनत्वं भरतक्षिताववपि विधेर्वामत्वहेतोर्भृशम् ।
नो जाने कति वा त्वदीयकवितामास्वादयेयुः स्वतः
साक्षात् श्वस्तनभारते मम कवे श्रीकालिदासानघ ।।

(श्रीकालिदासाष्टकात्)

बाल्ये सम्यगधीतिबोधनिरता तातेन संवर्धिता
या भर्त्रा परिपालिता प्रणयिना तारुण्यकाले मुदा ।
तस्याः शान्तिदयानिधेर्हितरतेः संपक्वबुद्धेरहो
योषाया दृढशासने स्थितवतः पुत्रस्य भाग्यं महत् ।।

(योषाष्टकात्)

खाद्यं येन तु पच्यते स दहनः क्रुद्धो भवेद्दाहकः
शाकच्छिच्छुरिका पिबेच्च रुधिरं निर्दोषहृत्स्थं बत ।
सर्वं वस्त्विह भूतलेऽस्ति विमलं भोक्ता भवेत् सात्त्विको
रे रे मित्रवरानघद्रविण ते कीर्तिर्भवत्वक्षता ।।

(द्रविणाष्टकात्)

दृश्यस्यानघरूपकस्य बहवः सन्त्यत्र भव्या गुणाः
पर्यालोचनतोऽमृतात्मकतया श्राव्यस्य साकं गुणैः ।
एवं हर्षविवर्धकाय निखिलक्षेमावहायादराद्
दत्तासीमधना जनाः खलु चलच्चित्राय हृद्याय हि ।।

(चलच्चित्राष्टकात्)

चारित्र्यं महिलाजनस्य विधिवत् संरक्षणीयं सदा
बालानामपि जीवितं बहुमतं ये भाविपौरा ध्रुवम् ।
येनेदं खलु तथ्यमादरवता विज्ञाय चाचर्यते
तेनैषा खलु सैनिकेन धरणिभव्या समुत्तंभिता ।।

(सैनिकाष्टकात्)

ग्रीष्मे तिग्मकरे तपत्यनुदिनं वर्षे सुवृष्ट्यन्विते
हैमाहेषु च शीतकम्पिततनुः पुण्यार्जनायोद्यतः ।

शश्वत् त्वां खलु लोकसंग्रहरतस्तस्मादकस्मादपि
ग्राम त्वां यदि विस्मरेयमधुना पापार्जनं मे भवेत् ॥

(ग्रामाष्टकात्)

एवं रीत्या समग्रादपि ग्रन्थात् बहून्युदाहरणानि दातुं शक्यानि। किन्तु स्थालीपुलाकन्यायेन यान्युदाहरणानि दत्तानि तैरेव काव्यस्यास्य गुणपौष्कल्यं सहृदयैः सम्यगवगम्यते हि। श्रीमतः अय्यरमहोदयस्य सत्कथामञ्जरी **पञ्चरत्नमणिमाला-भक्तितरङ्गिणी** प्रभृतयः सद्ग्रन्थाः अचिरेणैव सहृदयानां पुरतः प्रकाशितरूपेण समायास्यन्तीति आशास्यते।

एवं गीर्वाणवाणीकैङ्कर्यसन्ततदत्तचित्तस्य विनयादि सौशील्यनिधेः परमेश्वर अय्यर महोदयस्य दीर्घायुष्यं अरोगदृढगात्रत्वेन सम्पत्ति सौभाग्यसहितेन दिने दिने परिपुष्टिमेयुषा सार्धं प्रार्थ्यते ऽस्माभिः। सर्वजगन्नियन्ता सर्वज्ञः समग्रैश्वर्यप्रदाता सादरं संस्तूयते चैतदर्थम्। इति शम्

डॉ० रमाकान्त शुक्लः

२७, मई १९८१ महासचिवः, देववाणी-परिषद्, दिल्ली
सदाशयसमुच्चयः ६ वाणी-विहारः, नयी दिल्ली-११००५९

The Philosopher Poet
PARAMESWAR IYER

Born on 16th July. 1915 at Calicut (Kerala), *Pt. Parameśwar Iyer* hails from a Tamil Brahmin family that can trace its antecedents to the *Āsthāna Kavis* in the court of Tanjore Kings four centuries before, but none of his immediate ancestors had much to do in the field of Sanskrit Education or Literature. It was only an accident that compelled Shri Iyer to study Sanskrit seriously. He passed his S. S. L. C. examination in 1932 with creditable marks in Sanskrit and Mathematics. He wanted to join a College for higher studies in Mathematics but his father whose salary then was about Rs. fifty per month pleaded his inability to afford Rs. six or seven per month towards College fees then. The Principal of a College was ready to grant him freeship but other problems arose and the higher education matter was shelved. The boy drifted into Politics and was imprisoned in the Gandhian movement for national independence. After a year the boy joined Cochin Maharajah's Sanskrit Pathasala at TRIPUNITTURA where he studied *Nyāya* for two years and *Vedānta* for four years and passed, *Bhooṣaṇam* and *Śiromaṇi* examinations on a par with *Āchārya*'. He took some interest in literature but wrote mainly in Malayalam. He started as a Sanskrit teacher but the Headmaster of that School gave him more work in English, Mathematics etc.

He married in 1940 and in the course of the subsequent years appeared privately for nine University Examinations and became an M. A., B. T. He was a research Scholar in the Sanskrit Department of Madras University under late *Dr. C. KUNHAN RAJAH* with '*VĀCHASPATI MIŚRA*—A study' as the subject far research. Again the problem of domestic worries and expenses confronted him and he had to discontinue Research work and take up a teaching post in a College. After a few years the partition of Andhra from Madras in 1954 and the retrenchment move in the Govt. affected him. Thereafter he worked in High Schools teaching various subjects including Sanskrit. He finally retired from a High School in 1974.

In the meantime he had written much in Sanskrit, Hindi, Malayalam, English and Tamil. In September, 1976 he joined the Maharishi European Research University at Seelisberg in Switzerland as Professor of Sanskrit Literature and returned to India in August 1979. During these 1089 days of foreign stay he visited many places in Europe, U. K., S. America & West Indies giving talks and recitation of poems to selected intellectuals of different tongues through interpreters.

He became a regular meditator by the process of Transcendental Meditation ever since he came into contact with Maharishi Mehesh Yogi. The latent poetic talent in him flourished enormously and he has composed more than 4000 verses in the course of the last five years whereas until the year 1976 his total output in the whole of his life can be reckoned as only less than a thousand verses. The high quality of literary excellence in the verses composed during the last one year entitles them to be considered his masterpiece in the opinion

of many Indian and European Sanskrit Scholars. A brief reference to some of his excellent verses has been made in the Sanskrit Biographical sketch elsewhere in this book. We shall just make a rapid survey of his published and unpublished works.

Published works :

The collection of his poems in Malayalam called *ŚITHILACINTAKAL* (1937) and the Novel *MĀTṚBHUMIYUṬE MAṬITTAṬṬI-LEKKU* (1940) were his earlier attempts. He wrote many stories, Poems, essays, radio talks, plays etc. in Malayalam. He has translated many Tamil and Malayalam stories in Hindi journals. 1967-1970 Translation of *ŚIVAPURĀNA*, *LIṄGAPURĀṆA* and *GARUḌA PURĀṆA* and two works of Acharya Rajaneesh into English, Translation of many Hindi stories into English in journals are his main works in translation *108 TIRUKKURAL* Gems (from the Tamil Classic TIRUKKURAL) with Sanskrit & Malayalam verses and Hindi and English prose, was honoured by Dr. Radhakrishnan and Dr. Zakir Husein by means of cash awards and citations. *ĀNANDAPATHAPRA-DARŚIKA* consists of 108 wise sayings in English with Sanskrit and Hindi renderings.

While in Switzerland he attended the third and fourth world Sanskrit Conferences in June 1977 at Paris and in May 1979 at WEIMAR (East Germany). The paper read at Paris—"Concept of Dhyana" is remarkable for some excellent Sanskrit Poems on the of Dhyana (Meditation) Principles. *BHAGAVAD GĪTAPĀDA*

ŚIVASTAVA published in 1989 contains 108 verses as a prayer to Lord SIVA. One of the feet of each one of these verses is taken from the Holy BHAGAVADGITA and the idea is aptly fitted into the general character of the prayer and these passages give a substance of the philosophy of Bhagavad Gita. Further, the main tenets of the BHAKTI system as found in Narada's *BHAKTISUTRAS* and other works are also introduced suitably. *RAGHUVĪRAPAÑCARATNAM* is a small prayer of five verses of exquisite literary quality with translations in English and Hindi. *Ābhāṇaka-Manjarī* and *Sadaśaya Samuccaya* are good collections of Proverbs and wise sayings.

Unpublished Works :

More than 3000 verses in Sanskrit have not yet been published, So also the English translations of Narada, Vayu, Brahmanda and Skanda Puranas. *Satkathāmañjarī* is a collection of about fifteen story poems. He has composed more then 700 verses of prayer invoking different gods and goddesses. One remarkable feature of almost all these verses is the manner of their composition about which the poet has hinted thus :—

Rātriṣu svāpabhaṅgeṣpi śayyāsthena mayā Kṛtāḥ
Ślokāḥ stotrātmakāḥ kecicchabdālaṅkārabhāsurāḥ.

'*Prāsa*' or alliteration as obtained in Kerala has been invariably used in these verses of prayer.

Enonivṛtyā Paripāvanatvam
Dhyānonmukhatvañca Vivardhayanti
Manomudam bhaktajaneṣu baḍham
Tanotviyam Bhaktitaraṅgini me

is an example. *Swissdeśaprakṛtivarṇanam* contains many single verses about the natural beauty of various places in Switzerland. *Germany-yātrāvarṇanam* describes the poet's journey to various places in Germany. *Svāsthyasūktiratnāvalī* contains interesting verses about health and other allied topics. '*Sāhityakautukam*' contains 25 *Aṣṭakas* on various topics. This book can be considered the master piece of the poet. More about this with suitable examples can be known from the Sanskrit article.

Pandit Iyer's Personal Life :

Born in a lower middle class family and voluntarily choosing a life of very plain living and high thinking, he has remained throughout his life a very simple person struggling to make both ends meet—

Yena kenacidācchanno yena kenacidaśitaḥ.
Yatra kvacana śāyī syāttaṁ devā Brāhmaṇan viduḥ

This dictum is cent per cent true of Shri Iyer. He has served in about fifteen Educational Institutions (Primary to Post Graduate level) risking the ridicule of friends and relatives who used to comment—"A rolling stone never gathers moss". The KUMBHA LAGNA of his nativity, he believes to be responsible for his inability to gather a set of admirers around him despite the fact that the quality of his teaching as well as his literary output has always been of a very high order. Living a disciplined life of no extremes of any type whatsoever he is very active from three O' clock in the morning to nine at night. He finds rest in different types of activity such as teaching children, reading proofs, studying English literature, going through half a dozen daily papers regularly, writing book reviews etc. etc. much of them in the form of ghost writing with

little or no remuneration.

Unassumingly simple and modest by nature he has never alienated the sympathies of his well-wishers. Stoicism in the practical every day life has stood him in good stead. The Vedantic training in the early years years of his educational career has enabled him to brave the vicissitudes of life.

The message of his poems and philosophy of life is contained in the following verse once composed by him at the instance of some of his foreign disciples—

Hīnaṁ karma parityajan sukṛtimān sātatyato
Snuṣṭhita-
Dhyānaḥ samprati lokasaṅgraharato bhaktya-
dhvanīnastathā
Ānandaṁ paramātmabhedarahite jīve Snubhūya
svayaṁ
Jñānajyotiraśeṣadagdhaduritaḥ prāpnomi
mokṣam dhruvam

Let us pray to the Almighty to grant him the lease of a long life of vigorous literary pursuit.

(Dr.) Rama Kant Shukla
General Secratary
Devavani Parishad, Delhi

27.5.1981 R-6 Vani Vihar, New Delhi-110059

सदाशयसमुच्चयः

(भाषान्तरसूक्तीनां संस्कृतपद्यरूपान्तरम्)

SADĀŚAYASAMUCCAYAḤ

(Collection of good Thoughts.)

SADĀŚAYASAMUCCAYAḤ

(Collection of good Thoughts.)

1. As times go now, things are come to such a pass that, if a man pays what he owes his creditor's to say he is much obliged to him. **(Terence)**
2. As silver buried in the ground is of no colour, so a book which is not read has no real existence. **(Anonymous)**
3. The three best Doctors are Dr. Diet, Dr Quiet and Dr. Merryman. **(Old Proverb)**
4. A sharp tongue is the only edged tool that grows keener with constant use. **(Washington Irving)**
5. Man commits sins with pervious intention but where is that man who does a good thing by mistake ? **(Anon)**
6. To drive one's pigs to the market. To snore. **(Old saying)**
7. As writers become more numerous it is natural for readers to become more indolent. **(Goldsmith)**
8. The heights by great men reached and kept
   Were not attained by sudden flight;
   But they while their companions slept
   Were toiling upward in the night. **(Longfellow)**
9. A book may be amusing with numerous errors or it may be very dull without a single absurdity. **(Goldsmith)**

सदाशयसमुच्चयः

(भावान्तरसूक्तीनां संस्कृतपद्यरूपान्तरम्)

ऋणप्रत्यर्पणाशक्ताः काले स्वल्पे गते पुरा ।
अधमर्णा भृशं तप्तचित्ता आसन् निरन्तरम् ॥१॥

ऋणैकांशे पुनः प्राप्ते बहोः कालादनन्तरम् ।
उत्तमर्णाः पुनस्त्वद्य श्लाघन्ते भाग्यमादरात् ॥१(अ)

भूमिनिक्षिप्तरूप्यस्य कान्तिर्भवति निष्फला ।
ग्रन्थस्यापठितस्यापि गुणोत्कर्षो निरर्थकः ॥२॥

पथ्याशी शान्तचित्तश्च सन्ततोल्लासवांस्तथा ।
कदाचिदपि वैद्यानां नैव द्रक्ष्यति देहलीम् ॥३॥

विविधेपु च सन्तीक्ष्णधारोपकरणेष्वियम् ।
जिह्वैका सतताभ्यासात् तिग्मा तिग्मतरा भवेत् ॥४॥

पूर्वसङ्कल्पतः पापं नरः कर्तुं प्रभुर्ध्रुवम् ।
किन्तु को वा नरः स्याद्यः प्रमादात् पुण्यकृद् भवेत् ॥५॥

उच्छ्रिखनं प्रकुर्वाणः पाश्चात्यैरेवमुच्यते ।
सूकरं नयते हट्टं स्वपन्नप्येष पूरुषः ॥६॥

यदा यदा प्रवर्धन्ते साहित्यरचना क्षमाः ।
अलसाश्च निरुत्साहाः पाठकास्तु तदा तदा ॥७॥

सकृदुड्डयनात्सिद्धिः प्राप्तं नैत्रोन्नतं पदम् ।
व्यवसायः कृतोऽजस्रं अलसेष्वितरेषु तैः ॥८॥

सर्वासु भाषास्वपि किं न सन्ति ते
ग्रन्था विचित्रार्थयुता मुदावहाः ।
अयुक्तमुक्ता अपि नीरसाः क्वचित्
स्खालित्यपूर्णा अपि रोचकास्तथा ॥९॥

10. All men in the world are mindful of the ways and means of getting and enjoying the desired object.
(Old Saying)

11. Anyone may attain his desired object by some means or the other; but it is the manly and the intelligent one that really enjoys it. **(Anon)**

12. A precedent embalms a principle.

13. Little things affect little minds. **(Disraeli)**

14. The condition upon which God hath given liberty to man is eternal vigilance.
(John Philpot Curran)

15. When a dog bites a man that is not news; but when a man bites a dog that is news.
(Charles A Dana)

16. The world is a comedy to those that think; a tragedy to those that feel. **(Horace Walpole)**

17. There is probably no man living though ever so great a fool, that cannot do something or other well. **(Samuel Warren)**

18. Glories like worms afar cff shine bright.
But looked too near have neither heat nor light.
(John Webster)

19. Love alone gathers together materials for enjoyment and anger and hate those for war.
(Anonymous)

20. He is a beggar but very righteous; he never speaks a lie; he would rather die of starvation than steal.
(Old Saying)

21. Genius does what it must; and talent does what it can. **(Earl Lytton)**

22. The object of oratory alone is not truth but persuasion. **(Macaulay)**

अवाप्तिरुपभोगश्च वस्तुनो वाञ्छितस्य हि ।
ध्येयतामेति मर्त्यस्य सर्वस्यापि क्षमातले ॥१०॥

येन केनापि मार्गेण सर्वः प्राप्नोति वाञ्छितम् ।
उपभुंक्ते परं सम्यग् बुद्धिपौरुषवान् नरः ॥११॥

सुरभीकुरुते पूर्वाचारस्तत्त्वं नु मौलिकम् ॥१२॥

लघवो विषयाश्चित्तं व्याकुलीकुर्वते लघु ॥१३॥

अनेन समयेनेशः स्वातन्त्र्यं दत्तवान् हि नः ।
शाश्वतं जागरूकत्वं सन्त्यजेम न कर्हिचित् ॥१४॥

सारमेयो दशेन्मर्त्यं वृत्तान्तः स कथं भवेत् ।
मुद्रणं क्रियते पत्रे कुक्कुरं चेद् दशेन्नरः ॥१५॥

चिन्तकानां कृते हर्षप्रधानं विश्वमुच्यते ।
संवेदनवतां पुंसां दुःखपर्यवसायि तत् ॥१६॥

नरेषु भुवि जीवत्सु मूर्खः कोऽपि न तादृशः ।
यो हि सम्यक्तया कर्तुं कर्म किंचिन्न शक्नुयात् ॥१७॥

भ्राजते दूरतः कीर्तिर्यथासौ ज्योतिरिंगणः ।
न प्रकाशो न चोष्मापि समुपेत्य विलोकने ॥१८॥

उपभोगार्थसामग्री कामेनैवोपकल्प्यते ।
रणार्था सा सदामर्षद्वेषाद्यैश्च विधीयते ॥१९॥

अनृतं भाषते नैव धार्मिको याचकोऽपि सः ।
क्षुधया पीडितो मृत्युं वृणुयान्नैव चोरयेत् ॥२०॥

कुरुतेऽवश्यकर्तव्यं मेधावी मतिमान् नरः ।
कुरुते तद्धि यच्छक्यं उत्साही कुशलो नरः ॥२१॥

वाक्शौण्डतायाः प्रथमं प्रयोजनं
प्रोत्साहनं कर्मसु योजनं दृढम् ।
सत्यप्रतिष्टापनमत्र लक्ष्यतां
नाप्नोति कौटिल्यमतानुसारतः ॥२२॥

23. Persons prone to perpetual contemplation never commit mistakes but those who do not commit mistakes never do anything. **(Old Saying)**

24. Eliminate all these :—Poverty, Pain, Sin, faithlessness and false prestige due to nobility of birth. **(Traditional Prayer)**

25. Do not put all your eggs in one basket. Don't venture all you have in one speculation. **(Old Proverb)**

26. Ask yourself :—"Are you really happy?" The last bit of happiness will vanish then. **(Old Saying)**

27. It is better that ten guilty persons escape than one innocent suffer. **(Sir William Blackstone)**

28. The bride is no doubt rich and well behaved but many say that she is deaf and blind of one eye. **(Old Saying)**

29. Full many a gem of purest ray serene.
    The dark unfathomed caves of ocean bear.
Full many a flower is born to blush unseen
    And waste its sweetness in the desert air.
(Thomas Gray)

There is
30. One great Society alone on Earth
The noble living and the noble dead.
(Wordsworth)

31. If it is heaven for its climat, it is a hell for company. **(Sir James Barrie)**

32. If you have charm you don't have to possess anything else; if you don't have it of what avail is anything else ? **(Sir James Barrie)**

33. Getting drunk without thirst and enjoying sex out of season—these distinguish modern man from brute. **(Anon)**

34. To be great is to be misunderstood. **(Emerson)**

सततध्यानसंसक्तैर्न कदापि प्रमाद्यते ।
किन्तु कुर्यान्न किंचित् स स्खलितं न करोति यः।। २३।।

आकिञ्चन्यं व्यथां पापं श्रद्धाराहित्यमेव च ।
मिथ्यागर्वं कुलीनत्वे सर्वमेतदपाकुरु ।।२४।।

एकस्मिन् पिटके सर्वाण्यण्डानि निदधातु मा ।
व्यापारे पुनरेकस्मिन् सर्वस्वं न निधीयताम् ।।२५।।

आत्मानं पृच्छ-"सानन्दः सुखी किमसि वस्तुतः?" ।
सुखस्य च तिरोभूयात् अन्तिमोऽपि कणस्तदा ।।२६।।

मुक्ताः कामं पलायेरन् वहवोऽप्यपराधिनः ।
सन्तापानुभवो मा भूदेकस्यापि निरागसः ।।२७।।

वध्वाः सन्त्येव सौशल्यौवित्ताढ्यत्वादयो गुणाः ।
किन्तु सा वहुभिः काणा बधिरा चेति भण्यते ।।२८।।

तेजःकणान् दिक्ष्वभिविक्षिपन्ति
रत्नानि सन्त्यंबुधिगर्भगानि ।
हा हा सुमानि व्ययन्त्यनेका-
न्यात्मीयसौरभ्यमरण्यमध्ये ।।२९।।

उदारा येऽद्य वर्तन्ते ये चोदारा दिवं गताः ।
एतैरेव महामर्त्यसमाजो लभते यशः ।।३०।।

सुस्थितेः कालवातादेः स देशः स्वर्गसन्निभः ।
पौराणां किन्तु दौर्जन्यान्नरकाभोऽपि कथ्यते ।।३१।।

अस्ति चेत्सौभगं वध्वाः किमन्यैर्गुणभूषणैः ।
नास्ति चेत्सौभगं वध्वाः किमन्यैर्गुणभूषणैः ।।३२।।

पानसेवा तृषाभावे समयानियता रतिः ।
सभ्यमाधुनिकं नूनं विविनक्ति नरं पशोः ।।३३।।

अन्यथा गृह्यमाणत्वं महत्त्वस्य तु लक्षणम् ।
महतः को नु जानाति याथातथ्येन भूतले ।।३४।।

35. What is a weed ? A plant whose virtues have not yet been discovered. (Emerson)

36. If anyone finds pleasure in isolation and is averse to acontact with the common people he is either a barbarous fowler or a high Saint. (Anon)

37. One often calms one's grief by recounting it. (Anonymous)

38. It is a melancholy truth that even great men have their poor relations. (Dickens)

39. This only grant me, that my means may lie
Too low for envy; for contempt too high.
(Abraham Cowley)

40. I wish my deadly foe no worse
Than want of friends and empty purse.
(Nicholas Breton)

41. The rain falls on the just and the unjust; chiefly on the just because the unjust steals the umbrella from the just. (Lord Bowen)

42. There is nothing the body suffers that the soul may not profit by. (Anon)

43. The love of justice in most men is no more than the fear of suffering injustice. (Duc de la Rochefaucauld)

44. It takes great cleverness to be able to conceal one's cleverness. (Duc. de R.)

45. Quarrels would not last long, if the fault were only on one side. (Duc. de R.)

45. (a) We have all enough strength to bear other people's sufferings. (Duc. de R.)

46. An author who speaks about his own books is almost as bad as a mother who talks about her own children. (Benjamin Disraeli)

47. Life is made up of marble and mud. (Nathaniel Hawthorne)

48. Both Victory and defeat in a war bring about great sorrow and greater responsibility. (Anon)

अज्ञातगुणपौष्कल्यामौषधिं स्तम्बसंज्ञया ।
अवजानन्ति मूढा हि विवेकरहिता भृशम् ॥३५॥

एकान्ते प्रीतिमान् यः स्याज्जनसंसर्गनिःस्पृहः ।
निषादो वर्बरो वा स्यात्तपस्वी वा महामनाः ॥३६॥

स्वानि दुर्भागधेयानि वर्णयन्तः पुनः पुनः ।
आत्मग्लानिमहो केचिल्लघूकुर्वन्ति भागशः ॥३७॥

एतत् खेदात्रंह सत्यं विस्तृते क्षोणिमण्डले ।
महतामुरुकीर्तीनां निर्धनाः सन्ति बान्धवाः ॥३८॥

अल्पा भवतु मे संपदीर्ष्यां न जनयेद्यथा ।
तादृशी महती चापि यथावज्ञाऽपि नो भवेत् ॥३९॥

शत्रोर्मे सर्वथा देयं सर्वशक्त त्वया द्वयम् ।
नापरं; मित्रशून्यत्वं रिक्ता च धनभस्त्रिका ॥४०॥
यत्सत्यं बाधते वर्षा न्यायिनोऽन्यायिनस्तथा ।
इतरापहृतच्छत्रा बाध्यन्ते न्यायिनोऽधिकम् ॥४१॥
नास्ति पीडा शरीरस्य मर्त्यस्य सुमनस्विनः ।
तादृशी सुभृशं तस्य नात्मा लाभान्वितो यया ॥४२॥
वस्तुनो न्यायसंसक्तिर्मानवेषु बहुष्वपि ।
अन्या नो भविता भीतेरन्यायपरिपीडनात् ॥४३॥
परेभ्यः प्रथमं स्वस्य शिल्पवैदग्ध्यगूहने ।
अतिमात्रविदग्धत्वमावश्यकमितीरितम् ॥४४॥

एकस्यैवापराधश्चेद् द्वयोर्न कलहो मिथः ॥४५॥
पीडां सोढुं किलान्येषां पर्याप्तं बलमस्ति नः ॥४५-अ॥

कविर्यः स्वानि काव्यानि सततं श्लाघते भृशम् ।
माता या स्वान्यपत्यानि नूनं गर्ह्यावुभावपि ।॥४६॥

कोऽपि नैकान्ततो दुःखी कोऽपि नैकान्ततः सुखी ।
खचितो जीविताध्वा हि श्लक्ष्णपाषाणकर्दमैः ॥४७॥
संग्रामे विजयप्राप्तिस्तथैव च पराजयः ।
अतिखेदप्रदौ नूनमतिरिक्तधुरावहौ ॥४८॥

49\. 49 (a) The flowers anew, returning seasons bring
But beauty faded has no second spring.
(Ambrose Philips)

50\. The nurse sleeps sweetly, hired to watch the sick
Whom snoring she disturbs. **(William Cowper)**

51\. But war's a game, which, were their subjects wise
Kings would not play at. **(Cowper)**

52\. It is better to wear out than to rust out.
(Bishop Richard Cumberland)

53\. A fixed time for birth and a fixed time for death; A fixed time for sowing and a fixed time for reaping. **(Anon)**

54\. Government even in its best state, is but a necessary evil; in its worst state an intolerable one.
(Thomas Paine)

55\. A Great city is that which has the greatest men and women. **(Walt Whitman)**

56\. I believe that a leaf of grass is no less than the journey work of the stars. **(Walt Whitman)**

57\. For all sad words of tongue or pen
The saddest are these-"It might have been"
(J. G. Whittier)

58\. You may break, you may shatter the vase, if you will. But the scent of the roses will hang round it still. **(Thomas Moore)**

59\. Nothing begins and nothing ends
That is not paid with moan.

59\. (a) For we are born in other's pain
And perish in our own.
(Francis Thompson)

नवानि वहलामोदरम्याणि कुसुमान्यथ ।
स्फुटन्ति तरुवल्लीषु वसन्ते पुनरागते ॥४६॥

किन्तु निर्जितरंभासु रम्यासु महिलास्वपि ।
तारुण्यं विगतं हन्त पुनर्नायाति कर्हिचित् ॥४-६अ॥

रुग्णानामुपचारार्थं धात्री सा परिकल्पिता ।
निद्रिता घर्घरारावं कृत्वा तानेव बाधते ॥५०॥

संग्रामस्तादृशी क्रीडा जनरक्तैस्तथासुभिः ।
प्रजा यदि विवेकिन्यो रमेरन् यत्र नो नृपाः ॥५१॥

वरं धातुर्भृशं शश्वदुपयोगेन जर्जरः ।
मण्डूरकलुषं किं वा कालायसमभीप्सितम् ॥५२॥

नियते समये जन्म नियते समये मृतिः ।
बीजावापश्च सस्यानां लवनं चापि तादृशम् ॥५३॥

प्रशासनमपि प्राज्यमनिवार्यमनिष्टकृत् ।
गुणैर्न्यूनं च तत् प्रोक्तमभद्रमतिदुस्सहम् ॥५४॥

प्रासादै राजमार्गाद्यैः कल्प्यते न महापुरी ।
किन्तु साध्वीभिरग्र्याभिर्विद्वद्भिश्च महात्मभिः ॥५५॥

उच्चत्वतानुच्चताभेदः कार्यो नेश्वरसृष्टिषु ।
ग्रहतारादिभिस्तुल्यास्तृणपर्णलतादयः ॥५६॥

जनयन्ति मनोग्लानिमुक्तौ च लिखितेऽपि च ।
"अभविष्यत् तदेवं त्वि"त्यादीनि वचनानि हि ॥५७॥

कामं छिन्ध्यथवा भिन्धि सुमन.काचभाजनम् ।
परितस्तस्य सौरभ्यं विसर्पेदेव निर्भरम् ॥५८॥

तादृशं न भवेत् किञ्चिद्वस्तु कुत्रापि भूतले ।
यस्य जन्मनि नाशे च न स्याद्दुःखं व्यथापि वा ॥५९॥

कस्य जन्मनि नारोदीद्व्यथया जननी भुवि ।
मृत्युकाले भृशं दुःखं केन वा नानुभूयते ॥५९-ए॥

60. He that fights and runs away
May live to fight another day. (Anon)
For those that fly may fight again
Which he can never do that's slain.
(Samuel Butler)

61. Nothing doth more hurt in a state than that cunniug men pass for wise. (Bacon)

62. I force myself to laugh at everything for fear of being campelled to weep. (Anon)
Aad if I laugh at any mortal thing, ti's that I may not weep. (Byron)

63. A truth that's told with bad intent
Beats all the lies that you can invent.
(William Blake)

64. Those who restrain Desire do so because theirs is weak enough to be restrained.

65. Too little liberty brings in stagnation; too much of it brings chaos. (B. Russell)

66. If your desires be endless your cares and fears will be so too, (Thomas Fuller)

67. Too late is the medicine prepared when the disease had gained strength by long delay.
(Anonymous)

68. Education makes a people easy to lead but difficult to drive; easy to govern but impossible to enslave. (Lord Brougham)

69. Though love and all his pleasures are but toys, they shorten tedious nights. (Thomas Campion)

70. When one has been threatened with a great injustice one accepts a smaller one as a favour.
(Anonymous)

71. He raised a mortal to the skies; she drew an Angel down. (John Dryden)

कान्दिशीको भवन् शीघ्रं यो वै धावेद्रणाङ्गणात् ।
जीवेन्नूनं तथा योद्धुं शक्नुयाद्दिवसान्तरे ॥६०॥

धूर्तश्चैव तथा मायी प्राज्ञ इत्याद्रियेत चेत् ।
राष्ट्रधःपतने कालविलम्बो न भविष्यति ॥६१॥

सर्वकार्येषु सर्वत्राप्यहसिष्यं न चेद्धटात् ।
अरोदिष्यं न सन्देहो बलादिव नियोजितः ॥६२॥

दुष्टसंकल्पतः प्रोक्तमेकं वै सत्यमप्यहो ।
अधःकरोत्यसत्यानि कल्पितान्यखिलान्यपि ॥६३॥

ईप्सितानि निगृह्णन्ति केचित् किं तत्र कारणम् ।
हन्तैषां तान्यतीव्राणि सुदम्यान्यत एव हि ॥६४॥

स्वातन्त्र्यं यद्यपर्याप्तं गत्यभावं समानयेत् ।
अमर्यादस्तदुद्रेकः संकुलत्वं प्रचोदयेत् ॥६५॥

तत्त्वमेतत् स्फुटं जानीह्यनन्ताश्चेत् तव स्पृहाः ।
भयानि व्यग्रताश्चैव भवेयुस्तद्वदेव हि ॥६६॥

भृशं परिणते रोगे दीर्घकालव्यतिक्रमात् ।
विलम्बेनातिमात्रेण विहितं सज्जमौषधम् ॥६७॥

विनयाधानसम्पन्नो नीयते न प्रचोद्यते ।
तन्त्र्यते च सुखेनैव न दासीक्रियते ध्रुवम् ॥६८॥

भोगा वैषयिकाः सर्वे यद्यपि क्षणभङ्गुराः ।
शोकदीर्घतरां रात्रिं ह्रस्वीकुर्वन्त्यसंशयम् ॥६९॥

स्वामिनः करुणापेताद् गुर्वनीतिभयार्दितः ।
मन्यतेऽनुग्रहं क्षुद्रामनीतिं किंकरो ध्रुवम् ॥७०॥

जननी स्नेहसम्पन्ना स्वर्गमारोहयेन्नरम् ।
कामिनी रूपसम्पन्ना निरयं गमयेत्तथा ॥७१॥

72. Better to hunt in fields, for health unbought
Than fee the doctor for a nauseous drought.

72. (a) The wise for cure, on exercise depend;
God never made His work for man to mend.
(John Dryden)

73. Men have a touchstone whereby to try gold;
but gold is the touchstone whereby to 'try men.
(Thomas Fuller)

74. Kindness in another's trouble; courage in your own. (Adam Lindsay Gordon)

75. Where ignorance is bliss, tis folly to be wise.
(Thomas Gray)

76. Change is not made without inconvenience, even from worse to the better. (Richard Hooker)

77. Love is the wisdom of the Fool and folly of the wise. (Dr. Johnson)

78. Follow a shadow, it still flies you
Seem to fly it, it will pursue;
So, court a mistrees, she denies you;
Let her alone, she will court you.
Say, are not women, truly, then
Style but the shadows of us men? (Ben Jonsnon)

79. The traveller with empty pockets will sing in the thief's face. (Juvenal)

80. I keep six honest serving men
They taught me all I know;
Their names are What and Why and When
And How and where and Who.
(Rudyard Kipling)

81. The silliest woman can manage a clever man; but it needs a very clever woman to manage a fool.
(Rudyard Kipling)

मा मा श्रद्धत्स्व वैद्यस्य वमनोत्पादके द्रवे ।
वातले विपुले क्षेत्रे कुरु व्यायाममन्वहम् ।।७२।।

शश्वन्नैसर्गिकं मार्गं विद्वांसोऽनुसरन्ति हि ।
ईशसृष्टौ न सन्धानं कृत्रिमं किञ्चिदिष्यते ।।७२अ।।

हेम्नः शुद्धिपरीक्षार्थं विद्यते निकषोपलः ।
हेमैव हि नरस्यात्मशुद्ध्यवेक्षाकषोपलः ।।७३।।

अपरं दुःखितं दृष्ट्वा दयार्द्रहृदयो भव ।
स्वदुःखे हृदयं स्वीयमश्मसारसमं कुरु ।।७४।।

अज्ञतायां यदा सर्वे प्रहर्षं यत्र मन्वते ।
बुद्धिमत्ता भवेन्मौर्ख्यं तत्र शान्तिविघातिका ।।७५।।

उपरोधं विना नैव भविता परिवर्तनम् ।
अभद्राद् भद्रताप्राप्तिरप्यहो क्लेशकृन्मता ।।७६।।

बुध्यतां प्रेमबद्धत्वं बालिशस्य विवेकिता ।
वस्तुतः पूर्णमूर्खत्वं तदेव हि विवेकिनः ।।७७।।

धावन्तमनुधावन्ती प्रयान्ती चानुधावतः ।
छाया सा किं न कथ्येत चपलेवाङ्गना ध्रुवम् ।।७८।।

रिक्ता यस्य भवेद् भस्त्रा तस्य पान्थस्य वर्त्मनि ।
लुण्टाकादपि नो भीतिर्गायंस्तिष्ठेद्धि तत्पुरः ।।७९।।

किं नु, कस्मात्, कदा, कुत्र, कथं, कश्चेति षण्मम ।
सन्ति सर्वोपदेष्टारो विश्वास्या उपकारिणः ।।८०।।

शक्नुयात् स्ववशे कर्तुं मूर्खापि चतुरं नरम् ।
बालिशं स्ववशे कुर्यादन्यत्र चतुरैव हि ।।८१।।

ऊर्ध्वदृष्टिरधोदृष्टिर्जालरन्ध्रावलोकिनौ ।
एकः पश्यति ताराणि पङ्किलामपरो भुवम् ।।८२।।

यद्यद्धि गुरु गंभीरं स्वबुद्धिर्नावगाहते ।
तत्तदाराधयेदज्ञो विवेकप्रच्युतोऽबुधः ।।८३।।

82. Two men look out through the same bars
One sees the mud, and one the stars.
(Frederick Langbridge)

83. The ignorant man always adores what he connot understand. (Cesare Lombroso)

84. 84. (a) A man may die. Nations may rise and fall; but an Idea lives on. Ideas have endurance without death. (Old Saying)

85. If you would enjoy the fire, you must put up with the smoke. (Old Saying)

86. Virtue may be assailed, but never hurt; surprised by unjust force, but never enthralled.
(John Milton)

87. The mind in itself can make a heaven of hell and a hell of heaven. (Anon)

88. People of quality know everything without learning anything. (Moliere)

89. Unless a man feels he has a good enough memory he should never venture to lie.
(Michael de Montaigne)

90. Many a man has been a wonder to the world. whose wife and valet have seen nothing remarkable in him. (Michael do Montaigne

91. Poverty of good is easily cured; poverty of soul, impossible. (M. de M)

92. My ountry is the world, and my religion is to do good. (Thomas Paine)

93. If you want people to think well of you, do not speak well of yourself. (Blaise Pascal)

94. Think nothing done whilst aught remains to do.
(Samuel Rogers)

95. There is no cure for birth and death save to enjoy the interval. (George Santayana)

उत्थाय निपतेयुर्हि राष्ट्राणि प्रबलान्यपि ।
जनाश्च भुवि जायेरन् म्रियेरंश्च यथायथम् ॥८४॥
किन्तु पावनसङ्कल्पः सद्विचारः सदाशयः ।
अविच्छिन्नोऽनुबध्नाति जरामरणवर्जितः ॥८४अ॥

वह्नेरौष्ण्यादिकं सर्वमुपभोक्तुं यदीच्छसि ।
कदाचिद् धूमबाधा ते सोढव्यापि भवेद् दृढम् ॥८५॥

साध्वाचरणधर्मिष्ठो नाश्यते नहि दुर्जनैः ।
सन्निपत्याभियुक्तः स्यान्नैव दासीक्रियेत तैः ॥८६॥

मनः कल्पयतीवेमौ स्वर्गं च नरकं तथा ।
तत् स्वर्गं नरकं कुर्यान्नरकं स्वर्गमेव च ॥८७॥

अनुभावविशेषाढ्याः सत्त्वसम्पन्नतान्विताः ।
सर्वं ते खलु जानन्ति न किञ्चिदपि शिक्षिताः ॥८८॥

स्मृतिशक्तेरमोघायाः स्वात्मनि प्रत्ययो यदि ।
साहसं कर्तुमुद्युक्तो भवेदनृतभाषणे ॥८९॥

पत्नीभिः किङ्करैश्चापि नातिमात्रादृता भुवि ।
बभूवुर्बहवो बाढं सच्चमत्कारकारिणः ॥९०॥

वस्तुसम्पत्तिदारिद्र्यं दूरीकुर्याद्विना श्रमम् ।
आत्मवैभवदारिद्र्यमपाकर्तुं न कोऽप्यलम् ॥९१॥

मत्स्वदेशः समग्रैव पृथिवी सागराम्बरा ।
धर्म एष भवेयं यत् सर्वेषां हितकृत् सदा ॥९२॥

परेषां हृदि संकल्पस्त्वां प्रत्यस्त्वतिशोभनः ।
इति वाञ्छसि चेत्तर्हि स्वश्लाघाविमुखो भव ॥९३॥

भ्रातस्तव यदा किञ्चित् कर्तव्यमवशिष्यते ।
न किञ्चित् कृतमेवेति मतव्यं नात्र संशयः ॥९४॥

जन्ममृत्यू मतौ व्याधी दुश्चिकित्स्यौ महर्षिभिः ।
मध्यकालोपभोगेन विनोदय मनः सखे ॥९५॥

96. O ! many a shaft, at random sent
Finds mark the archer little meant !
And many a word, at random spoken,
May soothe or wound a heart that's broken.

(Sir Walter Scott)

97. He, that wants money, means and content, is without three good things.

(Upto 108 William Shakespeare)

98. Neither a borrower nor a lender be, for loan oft loses both itself and friend.

99. If all the year were playing holidays, to sport would be as tediaus as to work.

100. A little fire is quickly trodden out, which being suffered, rivers cannot quench.

101. Oh it is excellent to have a giant's strength, but it is tyrannous to use it like a giant.

102. They are as sick that surfeit with too much as they that starve with nothing.

103. The robbed that smiles, steals something from the thief.

104. Things sweet to taste prove in digestion sour,

105. What's in a name ? That which we call rose, by any other name would smell as sweet.

106. Men prize the thing ungained more than it is.

107. Some men are born great, some achieve greatness, and some have greatness thrust upon them.

धानुष्कमुक्ता विशिखा यदृच्छया
पतेयुरुद्दिष्टविभिन्नवस्तुषु ।
तथा वचांस्यक्रमतः समीरिता—
न्याश्वासयेयुश्च तुदेयुरप्युत ॥९६॥

द्रविणं चित्तसन्तृप्तिः सुखोपकरणानि च ।
यस्य नास्ति त्रयं लोके दुर्भगः स न संशयः ॥९७॥

ऋणदायी न भूयास्त्वं नार्णकर्ता कदाचन ।
ऋणस्य सुहृदश्चैव प्रणष्टिर्भविता ततः ॥९८॥

वार्षिकश्चेदनध्यायनिरर्गलमहोत्सवः ।
नियोग इव लीलापि भवेत् किं न श्रमावहा ॥९९॥

वह्निलेशः पदाक्रान्तः प्रशाम्यति निमेषतः ।
प्रमादात् प्रज्वलंस्त्यक्तः स न शाम्येन्नदीशतैः ॥१००॥

राक्षसीयबलोत्कर्षं प्राप्तुं यत्नं कुरु स्वयम् ।
किन्तु राक्षसवन्मा भूः प्रजापीडनकृत् सखे ॥१०१॥

समृद्धैर्विभवानां ये प्राज्यभोजनतत्पराः ।
भवेयुर्दृढनस्त्वस्था निरन्ना दुर्गता यथा ॥१०२॥

अनुद्विग्नः स्मितं कुर्वन् प्रतिहिंसापराङ्मुखः ।
मुषितोऽपहरत्येव तस्करादपि किञ्चन ॥१०३॥

पौनःपुन्येन भुक्तानि भक्ष्याणि मधुराण्यपि ।
अम्लतां यान्ति जीर्णानि बाधन्ते स्वास्थ्यमेव च ॥१०४॥

मल्लिका मालती वापि नलिनी यूथिका तथा ।
नामान्तरसमाहूता सौगन्ध्यं न परित्यजेत् ॥१०५॥

अप्राप्तं च तथाऽप्राप्यं यदि किञ्चिद्भवेद्भुवि ।
बालिशा हन्त मन्यन्ते वस्तु तन्मूल्यवत्तरम् ॥१०६॥

महान्तो जन्मना केचिन्महत्त्वं केचिदाप्नुयुः ।
बलादावेश्यते हन्त महत्त्वं केषुचित्तथा ॥१०७॥

108. Love sought is good; but given unsought is better.

109. 'Tis known by the name Perseverance in a good cause, and obstinacy in a bad one.
(Lawrence Sterne)

110. To travel hopefully is a better thing than to arrive and the true success is to labour.
(R. L. Stevenson)

111. He makes no friend who never made a foe.
(Alfred Tennyson)

112. In oder to carry out great enterprise, one must as if one will never have to die.
(Marquis Vauvenargues)

113. I do disapprove of what you say, but I will defend to the death your right to say it. (Voltaire)

114. A cynic is a man who knows the price of everything but the value of nothing.
(Oscar Wilde)

115. Laugh and the world laughs with you; weep and you weep alone. (Ella Wheeler Wilcox)

116. Strongest minds are often those of whom the noisy world hears least. (Wordsworth)

117. A God all mercy is a God unjust.
(Edward Young)

118. Sleep after toil, ease after war, death after life does greatly please. (Edmund Spenser)

प्रेम यत् प्रार्थितं दत्तं साधु स्यात् सगुणं च तत् ।
वरं तत् स्फुटितं सद्यो दत्तं च यदनर्थितम् ॥१०८॥

कर्मण्यनुचिते सक्तिः प्रोक्ता प्रतिनिविष्टता ।
सैव सत्कर्मसंलग्ना पूज्यतेऽभिनिविष्टता ॥१०९॥

प्रतीक्षमाणः शुभदां समाप्तिं
वरं व्रजेयं पथि खेदमुक्तः ।
आयाससातत्यमवेहि विद्वन्
याथार्थ्यतः कर्मणि सत्फलाप्तिम् ॥११०॥

बद्धवैरो न यस्यास्ति कोऽपि शत्रुरमर्षणः ।
नैव स प्रभवेत् प्राप्तुं मित्रं हृद्यतमं दृढम् ॥१११॥

स्वयं साधयितुं कर्म परेषां दुष्करं महत् ।
अजरामरवत्प्राज्ञः संसारेऽस्मिन् जिजीविषेत् ॥११२॥

नाभिनन्दामि ते वादं किन्तु तत्कथने तव ।
घोषयाम्यर्हतामुच्चैरपि दिष्टान्ततर्जितः ॥११३॥

सदा वक्रस्वभावोऽयं सर्वनिन्दारतः सदा ।
वेत्ति मूल्यं पदार्थानां किन्त्वर्घं नैव कस्यचित् ॥११४॥

हसन् पश्यति सर्वत्र हसन्तं सर्वमन्वहम् ।
हा हन्त रुदतः क्वापि न कोऽपि भविता सखा ॥११५॥

कः शृणोति कथा भव्याः प्रौढानां सुमनस्विनाम् ।
विवेकरहिते लोके जनकोलाहलान्विते ॥११६॥

समग्रकरुणामूर्तिमीश्वरं मा विभावय ।
प्रसज्येत तदा तस्मिन्नन्याय्यत्वमसंशयम् ॥११७॥

श्रमानुपदगा निद्रा शान्तिर्युद्धानुगामिनी ।
जीवितान्तगतो मृत्युः कथ्यते प्रीतिकृद् भृशम् ॥११८॥

119. O learnd one, tell me your humble servant-Does a donkey tethered with a rope in the vast courtyard of a library, become a scholar as time passes on ?

120. A servant indeed expects his monthly wages from his matser. Am I to render service unto Lord in the same manner ?

(Sufi Sayings until 124)

121. One who wants to sell a precious gem must go to a jeweller. Understand that he will not get even a fraction of its real value from a petty shop-keeper.

122. It penetrates into the gems; it unites many of them together; nay, it remains with them for long-still, a string is a string after all.

123. An arid unfertile land does not become covered with a luscious growth of vegetation merely because there happens to be a treasure-trove beneath.

124. On being asked, "When is one to take food ?", the learned one said : —"If he be poor, whenever he gets food; if he be rich, whenever he finds his stomach empty."

125. He who does whatever he can is a man; he who does who ever he wishes to do is a god.

(Napoleon)

ग्रन्थालयप्राङ्गणभूविभागे
पाशेन बद्धः किल रासभः किम् ।
कालेन पाण्डित्यसुमण्डितः स्या-
न्मां ब्रूहि विद्वन् विनयावनम्रम् ॥११९॥

भृतिं कामयते भृत्यः सकाशात् स्वामिनो ध्रुवम् ।
किमहं तद्वदीशस्य कर्तुमीहेय सेवनम् ॥१२०॥

विक्रेतुमिच्छन् बहुमूल्यरत्नं
गच्छेत्समीपं मणिकारकस्य ।
क्षुद्रस्य विन्देद्वणिजः सकाशा-
न्नायं सहस्रांशमपीति विद्धि ॥१२१॥

अन्तःप्रवेशं लभते मणीनां
बहनपीदं खलु संयुनक्ति ।
तैरेव साकं स्थितिरस्य शश्वत्
तथापि सूत्रं खलु सूत्रमेव ॥१२२॥

निधिर्महार्घः स भवेदधस्तात्
तस्माद्धि हेतो रतिमात्रशुष्कः ।
अनुर्वरः स्थण्डिलभूप्रदेशः
किं सस्यसुश्यामलतां प्रयाति ॥१२३॥

कदा कदा भोजन कर्म कार्य-
मितीह पृष्टः स्फुटमाह विद्वान् ।
यदा नु खाद्यं लभते दरिद्रो
यदोदरं पश्यति रिक्तमाढ्यः ॥१२४॥

स मानवो यः स्वयमेव कुर्या-
द्यद्यत् स शक्नोति च कर्तुमत्र ।
स ईश्वरो यः सततं च कुर्या-
द्यद्यत् स वाञ्छत्यपि कर्तुमत्र ॥१२५॥

126. Everyone eagerly longs for a word of esteem from a person whom he respects, the artist of his painting, the musician of his song and the poet of his lyric. **(Anonymous)**

127. The mouth of a serpent is not worthy of being kissed; the friendship of a rogue is undesirable; it is not advisable to be inimical to a crocodile within the sea and to be fond of a coutezan.

(Anon.)

128. It is only those sweet-voiced beautiful birds like parrots that undergo suffering due to being caged. Does anyone put in the cage the owl or the crow that is bereft of the said qualities ?

(Sufi saying)

129. A gem embedded in mud does not lose its value. Does the dust that rises far up into the sky get any increase in its value ? **(Sufi saying)**

130. The harm done by the meanness and wickedness of the malignant ones all over the world is far less indeed than that arising from the foolishness of the stupid and the blockhead. **(Sufi saying)**

131. There may be several holes in the poekets of even some great men. **(Anon)**

132. Then none was for a Party
Then all were for the State;

132. (a) The great man helped the poor,
And the poor man loved the great.

(Macaulay)

133. Whilst I am a beggar I will rail
And say there is no sin but to be rich;
And being rich my virtue then shall be
To say there is no vice but beggary.

(Shakespeare)

चित्रकारः स्वचित्रस्य स्वगीतेर्गायकोऽपि च ।
वाञ्छत्याप्तजनश्लाघां स्वकाव्यस्य कविस्तथा ॥१२६॥

भुजङ्गवक्त्रं न हि चुम्बनार्हं
खलस्य मैत्री न तु वाञ्छनीया ।
न सागरान्तर्मकरस्य वैरं
न वारनारीरतिरादरार्हा ॥१२७॥

खिन्नाः परं पञ्जरबन्धनेन
सत्पक्षिणस्ते शुकसारिकाद्याः ।
बध्नन्ति लोके किमुलूककाकौ
वाङ्माधुरीसुन्दरतादिशून्यौ ॥१२८॥

रत्नं निमग्नं यदि कर्दमे स्या-
न्नैव क्षयं यास्यति मूल्यमस्य ।
रेणुर्नभोमण्डलमुत्पतन् किं
मूल्यस्य वृद्धिं समुपैति हन्त ॥१२९॥

दुष्टदौरात्म्यसंभूता संसारवितता क्षतिः ।
मूर्खमौर्ख्यसमुत्थायाः क्षतेरल्पीयसी ध्रुवम् ॥१३०॥

महतामपि केषांचित् कूर्पासकगते बत ।
स्यूतकोशे भवन्त्येव छिद्राणि विविधानि हि ॥१३१॥

अयं निजः परो वेति नाभवत् पक्षपातिता ।
तदा सर्वेऽभवन् सज्जा राष्ट्रकल्याणकर्मणि ॥१३२॥
निर्धनोपकृतिं चक्रे धनिकः स्वार्थनिःस्पृहः ।
ध्यायति स्म शुभं यस्य निर्धनः प्रेमपूर्णहृत् ॥१३२अ॥

याचकः सन् पुराऽवोचं धनिकाः पापिनो दृढम् ।
अवाप्तविभवो वच्मि दुश्चरित्रा हि याचकाः ॥१३३॥

134. There is no greater source of weal than virtuous conduct. Thers is no greater source of worry than the forgetfulness thereof. (134-173. Tirukkural)4-2

135. A life of wedded bliss ennobled by virtuous conduct and perfect love has sanctity and fruitfulness therein. (5-5)

136. What is it that you lack if your wife is virtuous ? Of what avail is what you possess if she is vicious ? (6-3)

137. Far sweeter than nectar is the gruel stirred by the tiny hands of one's own progeny. (7-4)

138. "Ha, how sweet is the pipe ! Wonderfull note comes out of this lute !" These are the words of those who have never heard the lisping prattle of their children. (7-6)

139. Fortune will take up her permanent abode in the house of a man who serves his guests with a sumptuos feast with a cheerful face. (9-4)

140. Never forget the affection of men of spotless character. Never abandon the friendship of those who supported you in the time of adversity. (11-6)

141. A man may have learned many things. Still he is ignorant, if he is unable to accommodate himself to the world. (14-20)

142. Of what avail is an intensive and extensive study of many a text, if, axtuated by covetousness any one commits acts of stupidity in his dealings with everyone. (18-5)

धर्मस्याचरणात् परं किमपि ते नैवास्ति शर्मप्रदम् ।
तद्विस्मृत्युपचीय मानमखिलं जानाहि पापं सखे ॥१३४॥

धर्मपूतं सुगार्हस्थ्यमनघप्रेमभासुरम् ।
यदि स्यात्तेन नैर्मल्यं साफल्यं विद्धि तस्य तत् ॥१३५॥

ब्रूहि का नु भवतीह रिक्तता
गेहिनी गुणगणान्विता यदि ।
सा हितेतरकुमार्गगा भवेत्
का हि वा मनुज तेऽद्य पूर्णता ॥१३६॥

मण्डमालोडितं स्वापत्यांगुलीभिरितस्ततः ।
आस्वाद्यतरमेव स्यात् पित्रोः पीयूषयूषतः ॥१३७॥

वीणारवश्च मधुरो मधुरश्च वेणुः
शंकात्र केति सततं ननु ते वदन्ति ।
येषां तु कर्णविवरे दुरदृष्टरुद्धे
स्वापत्यजल्पनशतं पतितं न हि स्यात् ॥१३८॥

लक्ष्मीस्तस्य गृहे तिष्ठेत् प्रसन्नेन हि चेतसा ।
प्रत्यहं यस्तु सेवेत प्रसन्नवदनोऽतिथीन् ॥१३९॥

बन्धुनां दोषमुक्तानां मा विस्मर कदाचन ।
आपदुद्धारकाणां च सौहार्दं मा त्यज स्वयम् ॥१४०॥

अज्ञा एव हि ते ग्रन्थशताध्ययनपण्डिताः ।
अनभिज्ञा जनस्थानसमाजनयवर्त्मसु ॥१४१॥

सूक्ष्मबुद्धेर्बहुज्ञस्य किंफला शास्त्रविज्ञता ।
लोभसंमूढचित्तस्य कुकृत्यं कुर्वतः स्वयम् ॥१४२॥

143. If people were to see within and realize their own mistakes in the same manner as they observe others 'faults, can there be evil in the world ? (19-10)

144. Speaking trash in the presence of many persons is worse than acting ungraciously towards one's own near and dear. (20-2)

145. Saintly men gain esteem by conquering hunger. Can't those who alleviate the pangs of hunger of others gain a greater esteem ? (23-5)

146. Those who had lost their wealth may fortunately regain it some time thereafter; but those who have become despicable due to their ruthlesness can never have salvation. (25-8)

147. The hotter the fire in the refinery the greater is the refulgence of the gold that emerges from it; the sufferings that a man undergoes, the purer does his soul become. (27-7)

148. The majority of the world's population is in the grips of the devil of poverty because only very few really court sufferings in the form of austerity and the rest dread it. (27-10)

149. The arrow though straight in shape, is cruel in its actions and the lute though crooked in appearance produces heavenly music. The goodness or otherwise of everything has to be judged on the basis of actions and not appearance. (28-9)

संसारे क्वचिदप्यहोऽत्र दुरितं दृश्येत नैवाधुना ।
स्वस्यैवात्मनि वीक्षितो यदि भवेद् दोषः परेषामिव ।।१४३।।

सम्मुखे बहुजनस्य सन्ततं
निष्प्रयोजनविकत्थनं सखे ।
मित्रसम्मुखकृतात् कुचेष्टिताद्
गर्हणीयतरमेव मे मतम् ।।१४४।।

तपोधनानां प्रथितं महत्त्वं
क्षुधासहत्वैकनिबन्धनं चेत् ।
पर क्षुधां येऽपनयन्ति तेषां
सतां महत्त्वादवरं तदा स्यात् ।।१४५।।

नष्टश्रियः पुनरपि प्रभवेयुराप्तुं
पूर्वाधिकां श्रियमदृष्टवशात् कदाचित् ।
कारुण्यसद्गुणविहीनतयाऽधमत्वं
प्राप्ताः सदैव कथिता बत मुक्तिशून्याः ।।१४६।।

स्वर्णं सन्तप्यमानं ज्वलति समाधिकं श्यामिकामुक्तमेवम् ।
मर्त्यो दुःखाग्निदग्धो व्यपनयति तपस्तेजसा पापराशिम्
।।१४७।।

बहवो दीनताग्रस्ता व्यक्तमेवात्र कारणम् ।
तपःशून्या हि भूयांसस्तप्यन्ते विरलाश्च यत् ।।१४८।।

ऋजुः शरोऽयं परमर्मघाती
गीतामृतस्यन्दि ततं नु वक्रम् ।
गुणागुणौ संप्रति निश्चिनुध्वं
सत्कर्मदुष्कर्मभिरेव नृणाम् ।।१४९।।

150, Neither tonsure nor the growing of beard or matted and twisted hair becomes essential if what is condemned by the world is eschewed. (28-10)

151. Where wrath is ineffectual, it is indeed an evil; there is nothing worse than it where it is effective. (31-2)

152. To punish effectively those who frequently indulge in evil actions towards you, make them ashamed of themselves by your benevolent deeds, and forget both. (32-4)

153. Lechery, loss of temper and lack of sense if their very names disappear, all your sickness comes to an end. (36-10)

154. Wealth in the hands of the illiteterate can cause more sorrow then poverty that befalls the learned. (41-8)

155. The career of those who never care to check their faults beforehand shall perish like dry straw in a blazing flame. (44-5)

156. Prizing the company of the great and making them one's own kinsmen is the rarest of all achievements. (45-3)

157. Snapping of ties with the good causes ten times more sorrow than the incurring of the enmity of many foes. (45-10)

158. A limited income need not cause anxiety if the expense does not swell up. (48-8)

159. In the broad daylight the owl is easily overcome by the crow. A king who desires to cause a crushing blow to his enemies must seek the opportune moment. (49-1)

त्यज्येत यदि निश्शेषं कर्म लोकविगर्हितम् ।
किं साध्यं मुण्डनश्मश्रुजटाजूटादिभिस्त्वया ॥१५०॥

अस्थानरोषो विदितो नु हेयः
स्थाने कृताद् गर्ह्यतरं च नान्यत् ॥१५१॥

दण्ड्येरन् कथमुच्यतामविरतं दुष्कर्म कुर्वन्ति ये
कुर्याः सद्व्यवहारमेव न चिराद् जिह्रीयुरेव स्वयम् ॥१५२॥

कामः क्रोधस्तथा मोहो नरस्य रिपवस्त्रयः ।
निःशेषं तेषु नष्टेषु भवेत्तस्य कुतो रुजा ॥१५३॥

संपत्तिर्ब्रत मूर्खहस्तपतिता सन्तापकृन्मे मता
दारिद्र्या दपि दुःखसञ्चयकरादभ्यस्तविद्यस्य वै ॥१५४॥

दोषेष्वप्रतिवारितेषु नितरां सम्पन्नता देहिनां
दीप्ताग्नेः पुरतोऽतिशुष्कतृणचञ्चुसमीभवेदञ्जसा ॥१५५॥

सन्तश्चेदनुकूलिताः सविनयं संप्रीणिताः सेवया
दुष्प्रापं खलु लीलयैव शुभदं वस्तु त्वयासादितम् ॥१५६॥

शङ्कात्र का बहुभिरुद्भटबाहुवीर्यैः
साकं समाकलितदुर्वहशत्रुतायाः ।
सत्सङ्गतिच्युतिभवः कथितो नु दोषो
विज्ञैरसौ दशगुणाधिकदुर्विपाकः ॥१५७॥

अल्पेनायेन को दोषो व्ययो यावन्न वर्धते ॥१५८॥

जीयते हि दिवा काकेनोलूको बलवानपि ।
प्रहरंस्तु यथाकालं शत्रुं जयति दुर्जयम् ॥१५९॥

160. Chhecking up the good points after surveying the weakness, examine which prevails over which and then judge the man. (51-4)

161. The affluence of one in life devoid of kinsfolk gathered round him for friendly chat, is like the gushing in of flooding waters into the lake where the encircling bund is missing. (53-3)

162. Does not incessant flow of unappeased tears of sufferers under him, erode the riches of the king as if with a sharp file ? (56.5)

163. Even the vast wealth of the man rough and rigid in speech, lacking in looks of amiablitity, will no longer increase but perish immediately. (57-6)

164. The magnanimity of being invariably benign even to those who habitually offend us is the highest of all virtues. (58-9)

165. No man is looked down if fortune is unfavourable to him; it is ignominious indeed if a man does not endeavour to do his utmost after learning what should be learnt. (62-8)

166. Those who never boasted before, while in affluent circumstances—"Ha ! See ! I have this ! I have this !" will never cry in distress "Lost ! Everything is lost!" (63-6)

167. What is acquired through tears caused will slip off along with tears shed. Though there may be an initial set-back, good deeds will surely bring in rewards later. (66-9)

गुणदोषौ परिज्ञाय तारतम्यविवेकतः ।
गुणिनं दोषिणं वापि नरं निश्चिनु सर्वदा ॥१६०॥

संपत्तिः संत्यजन्द्बन्धुवर्गरिक्तस्य देहिनः ।
वहद्द्वारोव कासारे सर्वतः संप्लुतोदके ॥१६१॥

निजप्रजानां विपदर्दिताना-
मसान्त्वनानां पतिताश्रुधारा ।
असंशयं हन्त नृपस्य सप-
द्विभेदने व्रश्चनतीक्ष्णधारा ॥१६२॥

परुषवचनशालिनो नरस्य
स्फुटकरुणार्द्रतया विहीनदृष्टेः ।
अवधिरहितमप्यहो धनं तत्
सपदि लयं बत यास्यतीति विद्धि ॥१६३॥

स्त्रस्मै द्रुह्यन्ति ये तानुदितकरुणया वीक्ष्य दृष्ट्या समस्तं
दोषं मृष्यन् प्रकृत्या स्मितमधुरमुखः कीर्तितोऽसौ महात्मा
॥१६४॥

ज्ञेयं साधु परि ज्ञाय पौरुषं न करोति यः ।
श्रेयसे, स हि धिक्कार्यो हतभाग्यो न गर्हितः ॥१६५॥

प्राप्तं प्राप्तमिति प्रकृष्टविभवे येषां न हर्षो महान्
नष्टं नष्टमिति स्वनिर्धनतया किं सन्ति से व्याकुलाः
॥१६६॥

पराश्रुधारापतनात् समार्जितं
निजाश्रुधारासहितं प्रयास्यति ।
शतं क्षतीनां प्रथमं प्रयच्छद-
प्यवेहि सत्कर्म हि सत्फलप्रदम् ॥१६७॥

168. Many there are ready to die in the battle field but few indeed are they who never dread to address an assembly of the learned.

169. No sense of shame, no pursuit of duty, no feeling of sympathy and no cherishing of virtue- these four are congenital in a fool. (84-3)

170. Sweet indeed is the friendship contracted by or with a fool no sorrow is felt at the time of parting. (84-9)

171. If you desire all round welfare, be ashamed to do undesirable things. By being humble and polite for ever you can maintain the nobility of your family. (96-10)

172. Merely by occupying a high post the petty-minded cannot be considered great; though of a humble status, the noble-hearted, averse to misdeeds, cannot be callled base. (98-3)

173. Assimilation of food taken in, is far sweeter than consuming; so also the feigned anger of the beloved is more heartening than even a close embrace. (133-6)

—: o :—

अविरला विपदग्रहसन्मुखा
मरणमारणमार्गचरा रणे ।
अविचला बहुपण्डितमण्डिते
ननु नरा विरला हि सभागृहे ॥१६८॥

कृत्यबोधविरहोऽस्तलज्जता
निर्दयत्वमपि धर्मविच्युतिः ।
दृश्यते किल चतुष्टयं त्विदं
मूर्खपूरुषगतं निसर्गतः ॥१६९॥

मधुरं मूर्खसौहार्दं वियोगे यन्न दुःखदम् ॥१७०॥
अकृत्ये धृतलज्जेन भाव्यं भावुकमिच्छता ।
नम्रेण चिररात्राय रक्षिता स्यात्कुलोन्नतिः ॥१७१॥

नैव तुङ्गपदारूढो महत् कर्म विना महान् ।
धराशाय्यपि नो नीचो नीचकृत्यपराङ्मुखः ॥१७२॥

भोजनादपि भुक्तस्य जरणं मधुरं स्मृतम् ।
व्याजकोपो नितम्बिन्याः सङ्गमाद्धृदयङ्गमः ॥१७३॥

—:०:—

पुस्तकसमीक्षा

(१) **सुभाषितसुमनोञ्जलिः** (मुक्तककाव्यम्) : **प्रणेत्री** डॉ० मिथिलेशकुमारी मिश्रा; **प्रकाशकः** वाणी-वाटिका-प्रकाशनम्, पाटलिपुत्रम्-४; १९८०; मूल्यम् रु०३.०० ।

अस्मिन् शतप्रायपद्यमिते सुभाषितपरके मुक्तककाव्ये एकनिष्ठापरगुणग्राहकता-सत्याविष्करण-सत्त्वगुण-प्रियमिलन-लोकोपकारेश्वरसर्वगुरुत्व - घटनाक्रम - सद्ग्रन्थलाभ- गुरुप्रसाद-तृष्णा-भाग्यारसिकनिवेदितकविताशोभाराहित्य-विगतमोहविशोकजनशोभा-नेतृधूर्तत्व--समकालीनदुरवस्था-यथार्थजननायकत्व-जठराग्नि--सेवा-चिन्ता-सत्पुत्र-देशभक्ति--कुसंगसन्सङ्गतिप्रभृतिविषयेषु शिखरिणी-वसन्ततिलका-द्रुतविलम्बित-शार्दूलविक्रीडित–अनुष्टुबुपेन्द्रवज्रा--तोटकप्रभृतिच्छन्दोभिरुदीयमानया कवयित्र्या विचाराः प्रस्तुताः । भाषायाः समासशक्तिः कल्पनायाश्च समाहारशक्तिर्द्रष्टव्या विद्यते, यथा—"**परिभाषा न स्नेहस्य, अर्थो धर्मस्य वै कुतः । सीमा नैवास्ति कामस्य, लोभे चक्षुर्न विद्यते ।।**" किन्तु क्वचित् वर्णवृत्तनियमानामपालनं, क्वचित्संयुक्ताग्रस्यादीर्घत्वमनेकत्र चाशुद्धं मुद्रणं कवयित्रीं भविष्यद्रचनासु सावधानतामवलम्बयितुं निर्दिशन्ति । स्वरचनायै लेखिकाभिनन्द्यते ।

(२) **सागरिकायाः** (ऊनविंशवर्षे प्रथमोऽङ्कः २०३७ संवत्सरे) **अर्वाचीनसंस्कृतमहाकाव्यविशेषाङ्कः । ले०** डॉ० रहसबिहारी द्विवेदी । **प्रधान सम्पा०** डॉ०रामजी उपाध्यायः **प्रका०** सागरिका-समितिः, गौरनगर, सागर (म० प्र०) ।

विदुषा लेखकेनास्मिन् ग्रन्थे सप्तत्रिंशत्-संख्यकानाम् अर्वाचीनसंस्कृतमहाकाव्यानां (१९६१-१९७० कालावधौ रचितानां) समीक्षणं कृतम् । '**अर्वाचीनमहाकाव्यतत्त्वविमर्श**'-शीर्षको निबन्धो लेखकस्य गभीरमध्ययनं व्यनक्ति । 'केषाञ्चन महाकाव्यानां महाकाव्यसूच्यां नामोल्लेखः कृतोऽस्ति किन्तु तत्प्राप्त्यभावे तेषां समीक्षणं न कृतम् लब्धेषु तेषु तेषामपि समीक्षणं करिष्यते'-इति या लेखकस्य प्रतिज्ञा वर्तते तस्याः पूर्तिः काम्यते ।

रमाकान्त शुक्लः

देववाणी-परिषदा प्रकाशिताः
संग्रहणीया ग्रन्थाः

१.	अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः) (सं० : डॉ० रमाकान्तशुक्लः) (दुष्प्राप्यः)	रु० १५.००
२.	अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (द्वितीयखण्डः) (सं० : डॉ० रमाकान्तशुक्लः)	रु० ३०.००
३.	कर्णभूषणम् (डॉ० सी० आर० स्वामिनाथन्) (पेपरबैक)	रु० ५.००
४.	देववाणीदर्शनम् (दुष्प्राप्यम्)	रु० ५०.००
५.	भाति मे भारतम् (काव्यम्) (प्रणेता-डॉ० रमाकान्तशुक्लः)	रु० ४०.००
६.	श्रीकृष्णचरितम् (उ०प्र०शासन-पुरस्कृतं महाकाव्यम्) (प्रणेता-डॉ० रमेशचन्द्रशुक्लः)	रु० ३०.००
७.	सुगमरामायणम् (उ०प्र०-हरियाणा-शासन-पुरस्कृतं महाकाव्यम्) (प्रणेता-डॉ० रमेशचन्द्रशुक्लः)	रु० ३५.००
८.	हरविजयस्य साहित्यिकमध्ययनम् (डॉ० कृष्णकान्तशुक्लः)	रु० ६०.००
९.	श्रीमदप्पयदीक्षितचरितम् (गद्यकाव्यम्) (डॉ० हरिनारायणदीक्षितः)	रु० २०.००
१०.	भारतस्वातन्त्र्यसंग्रामेतिहासः (डॉ० रमेशचन्द्रशुक्लः)	रु० ३५.००
११.	सदाशयसमुच्चयः (प्रणेता-श्री टी० वी० परमेश्वर अय्यरः)	रु० १५.००
१२.	आभाणकमञ्जरी (प्रणेता-श्री टी० वी० परमेश्वर अय्यरः)	रु० १५.००
१३.	मेघदूत : एक विश्लेषण (लेखक : डॉ० देवीदत्त शर्मा)	रु० २०.००
१४.	रघुवंश : एक विश्लेषण (,, ,,)	रु० २०.००
१५.	अभिज्ञानशाकुन्तल : एक विश्लेषण (,, ,,)	रु० २०.००
१६.	कालिदास की कला और संस्कृति (भाग २) (,, ,,)	रु० ६०.००

प्राप्तिस्थाने

१. 'देववाणी-परिषद्, दिल्ली' ६ वाणी-विहारः, नयी दिल्ली-११००५९

२. सुधाकमल ग्रन्थालय, २६४, उत्तरी गांधी कालौनी, मुजफ्फरनगर